धुतः, त्रि, ( धु + क्तः । ) त्यक्तः । विधूतः । इति मेदिनी । ते, २८ ॥ ( यथा, रघुः । ११ । १६ ।

"तीव्रवेगधुतमार्गवृक्षया
प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया
वात्ययेव पितृकाननोत्थया ॥")

धुनिः, स्त्री, ( धुनोति वेतसादिनदीजाततरून् इति । धु कम्पने + बहुलवचनात् निः स च कित् । ) नदी । इत्यमरटीकायां भरतः ॥ ( यथा, ऋग्वेदे । २ । ३० । २ ।

"पयोदरन्तीरुतुजोषमस्मै
दिवे दिवे धुनयो यन्त्यर्थम् ॥"

पुं, जलप्रतिरोधकोऽसुरविशेषः । यथा, तत्रैव । १ । १७४ । ६ ।

"त्वं धुनिरिन्द्रधुनिमतीॠर्णोरपः सीरान-स्रवन्तीः ॥"

"हे इन्द्र त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेततरङ्गवतीः अथवा धुनिर्नामजलप्रतिरोधकार्य्यसुरः स एव प्रतिबन्धकतया यासां तादृशीरपः ॥" इति तद्भाष्ये सायनः । धूनयति कम्पयति शत्रूनिति । मरुद्विशेषः । यथा, वाजसनेयसंहितायाम् ।३६।७।

"उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥"

कम्पयितरि, त्रि । यथा, ऋग्वेदे । १ । ७९ । १ ।

"हिरण्यकेशो रजसोविसारेऽहिर्धुनिर्वात इव ध्रजीमान् ॥")

धुनी, स्त्री, ( धुनि + कृदिकारादिति वा ङीष् । ) नदी । इत्यमरः । १ । १० । ३० ॥ ( यथा, भागवते । ४ । २६ । ५५ ।

"सत्वं विचक्ष्व मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीष चित्ते ॥")

धुनीनाथः, पुं, (धुनीनां नदीनां नाथः ।) समुद्रः । इति राजनिर्घण्टः ॥

धुन्धुमारः, पुं, ( धुन्धुं तन्नामकं राक्षसं मारयतीति । मारि + अण् । ) कुवलयाश्वराजः । स तु बृहदश्वपुत्रः । इति पद्मपुराणम् ॥ ( अस्य धुन्धुमारत्वकथा यथा, हरिवंशे ।११।३६—५५।

"स एवमुक्तो राजर्षिरुतङ्केन महात्मना ।
कुवलाश्वं सुतं प्रादात् तस्मै धुन्धुनिवारणे ॥
बृहदश्व उवाच ।
भगवन् ! न्यस्तशस्त्रोऽहमयन्तु तनयो मम ।
भविष्यति द्विजश्रेष्ठ ! धुन्धुमारो न संशयः ॥
स तं व्यादिश्य तनयं राजर्षिर्धुन्धुमारणे ।
जगाम पर्व्वतायैव तपसे संशितव्रतः ॥
कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिव ! ।
प्रायादुतङ्कसहितो धुन्धोस्तस्य परिग्रहे ॥
तमाविशत् तदा विष्णुर्भगवांस्तेजसा विभुः ।
उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया ॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् ।
एष श्रीमान्नृपसुतो धुन्धुमारो भविष्यति ॥
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन् ।
देवदुन्दुभयश्चापि प्रणेदुर्भरतर्षभ ! ॥
स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान् ।
समुद्रं खानयामास वालुकार्णवमव्ययम् ॥
नारायणेन कौरव्य ! तेजसाप्यायितः स वै ।
बभूव सुमहातेजा भूयो बलसमन्वितः ॥
तस्य पुत्रैः खनद्भिस्तु वालुकान्तर्हितस्तदा ।
धुन्धुरासादितो राजन् ! दिशमाश्रित्य पश्चिमाम् ॥
मुखजेनाग्निना क्रोधाल्लोकानुद्वर्त्तयन्निव ।
वारि सुस्राव वेगेन महोदधिरिवोदये ॥
सोमस्य भरतश्रेष्ठ ! धारोर्म्मिकलिलं महत् ।
तस्य पुत्रशतं दग्धं त्रिभिरूनन्तु रक्षसा ॥
ततः स राजा कौरव्य ! राक्षसं तं महाबलम् ।
आससाद महातेजा धुन्धुं धुन्धुनिबर्हणः ॥
तस्य वारिमयं वेगमापीय स नराधिपः ।
योगी योगेन वह्निञ्च शमयामास वारिणा ॥
निहत्य तं महाकायं बलेनोदकराक्षसम् ।
उतङ्कं दर्शयामास कृतकर्म्मा महायशाः ॥
उतङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने ।
अददाच्चाक्षयं वित्तं शत्रुभिश्चापराजयम् ॥
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयम् ।
पुत्राणाञ्चाक्षयाल्लोँकान् स्वर्गे ये राक्षसा हताः ॥"*॥)

शक्रगोपः । गृहधूमः । पट्टालिकः । इति मेदिनी । रे, २७० ॥

धुरन्धरः, पुं, धववृक्षः । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा,—

"धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ धुरं धरतीति । धृ + खच् + मुम् । ) रथलाङ्गलादिभारवोढ़ा । तत्पर्य्यायः । धुर्व्वहः २ धुर्य्यः ३ धौरेयः ४ धुरीणः ५ । इत्यमरः ।२। ९ । ६५ ॥ यथा,—

"धुरन्धरो धुरीणश्च धौरेयधुर्य्यधुर्व्वहाः ।
यत्र काष्ठरथस्यापि लाङ्गलस्यापि वा धुरम् ॥
वहत्येकधुरीणः स्यात्तथा चैकधुरोऽपि च ।
स तु सर्व्वधुरीणः स्यात् सर्व्वा वहति यो धुरः ॥"

इति शब्दरत्नावली ॥

(आदित्यनृपस्य मन्त्री । स तु कौशलेन राजानं हत्वा स्वयमेव राज्यमकरोत् ॥ यथा, राजावल्याम् २ परिच्छेदे ।

"आदित्यस्य तदा मन्त्री अदूरान्वयसम्भवः ।
धुरन्धराभिधो धीरो बलबुद्धिनिकेतनः ॥
सेनापतीन् वशीचक्रे धनमानप्रदानतः ।
एकदा स तमादित्यमादित्यसमवर्च्चसम् ॥
एकान्ते नृपमासीनं हत्वा हतमतिस्तदा ।
तदासनं समारुह्य राज्यं प्राप्नाद्धुरन्धरः ॥
भूमिवेदमितान्वर्षान्भुक्त्वा भोगाननुत्तमान् ।
सेनोद्धतं सुतं राज्ये स्थापयित्वा लयं गतः ॥"

राक्षसविशेषः । स तु प्रहस्तस्य सचिवविशेषः । यथा, गौः रामायणे । ६ । ३२ । १५ ।

"एतस्मिन्नन्तरे शूराः प्रहस्तस्य वशानुगाः ।
धुरन्धरः कुम्भहनुर्महानादः समुन्नदः ।
एते प्रहस्तसचिवाः सर्व्वे जग्मुर्वनौकसः ॥")

धुर्व्वाहकमात्रे, त्रि ॥ ( यथा, महाभारते । ३ । १९६ । १० ।

"अनड्वाहं सुव्रतं यो ददाति
हलस्य वोढ़ारमनन्तवीर्य्यम् ।
धुरन्धरं बलवन्तं युवानं
प्राप्नोति लोकान् दशधेनुदस्य ॥"

श्रेष्ठः । यथा, तत्रैव । १३ । १३७ । ३१ ।

"दत्त्वा तु सततं तैस्तु कौरवाणां धुरन्धर ! ।
दानयज्ञक्रियायुक्ता बुद्धिर्धर्म्मोपचायिनी ॥")

धुरा, स्त्री, ( धुर् + पचे टाप् । ) धूः । भारः । इत्यमरटीकायां भरतः ॥

धुरीणः, त्रि, (धुरं वहतीति । "खः सर्व्वधुरात् ।" ४ । ४ । ७८ । इत्यत्र योगविभागवत् खः । ) भारवाहः । इत्यमरः । २ । ९ । ६५ ॥ (श्रेष्ठः । यथा, पञ्चतन्त्रे । ३ । २०७ ।

"हे ब्रह्मव्रतधराणां धुरीण ! त्वयापि मय्युपकृतमित्यादुक्त्वा स्कन्धादुत्तार्य्य यत्र यत्र स्वजनगृहद्वारादिषु बभ्राम ॥")

धुरीयः, पुं, ( धुरमर्हतीति । छः । ) अनड्वान् । इति राजनिर्घण्टः ॥ भारयोग्ये, त्रि ॥

धुर्य्यः, त्रि, ( धुरं वहतीति । धुर् + "धुरो यड्ढकौ ।" ४ । ४ । ७७ । इति यत् । "न भकुर्छुराम् ।" ८ । २ । ७९ । इति न दीर्घः । ) धुरन्धरः । इत्यमरः । २ । ९ । ६५ ॥ ( यथा, रघुः । ५ । ६६ ।

"तामेकतस्तव बिभर्त्ति गुरुर्विनिद्रस्तस्या भवानपरधुर्य्यपदावलम्बी ॥"

श्रेष्ठः । यथा, भागवते । ४ । २२ । ४६ ।

"वयन्तु धुर्य्यो महतां संस्थिताध्यात्मशिक्षया ॥"

ऋषभौषधौ अनडुहि च पुं । इति राजनिर्घण्टः ॥ ( अश्वादिरपि । यथा, महाभारते । ३ । १९७ । १२ । "पुनरपि चान्योऽश्वमर्थी ब्राह्मण आगच्छत् । त्वरितोऽथ तस्मै अपनह्य वामं धुर्य्यमददत् अथ प्रायात् ॥" )

धुर्व्व, ई हिंसे । इति कविकल्पद्रुमः ॥ ( भ्वा-परं-सकं-सेट् । ) ई धूर्व्वी । धूः धुरौ धुरः । ई, धूर्णः । कितवे वाच्य धूर्त्तः । इति मनीषादित्वान्निपात्यः । इति दुर्गादासः ॥

धुवका, स्त्री, ( धवति पुनः पुनरुच्चारणेन गीतं कम्पयतीवेति । धू कम्पने + "कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणां २ । ३२ । इति क्कुन् । ततष्टाप् । ) ध्रुवका । इत्युणादिकोषः ॥ धूया इति भाषा ॥

धुवनः, पुं, ( धवतीति । धू + "भूसूधूभ्रस्जिभ्यश्छन्दसि ।" उणां २ । ८० । इति क्युन् । ) अग्निः । इति सिद्धान्तकौमुदी ॥ ( यथा, शतपथब्राह्मणे । १३ । २ । ८ । ५ ।

"ये यज्ञे धुवनं तन्वते ॥" )

धुवित्रं, क्ली, ( धूयतेऽनेनेति । धू + इत्र । ) यज्ञाग्निज्वालनार्थमृगचर्म्मरचितव्यजनम् । इत्यमरः । २ । ७ । २३ ॥

धुस्तुरः, पुं. धुस्तूरः । इत्यमरटीकायां भरतः ॥